International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

# मनुना उक्ताः स्त्रियः प्रतिकुलांशाः

**Dr chaitanya kumar bandi**
**Guest faculty, Dept of Dharmasastra**
**National sanskrit university, Tirupati**
**Ph.  - 9676113384**

मनुः बहुधा स्त्रियः उपकारकान् धर्मानुक्त्वापि बहून् प्रतिबन्धकानपि स्त्रीविषये उक्तवानिति निशितपरिशीलनेन ज्ञायते । अध्यायक्रमेण मनुना दर्शिताः स्त्रियः प्रतिकूलांशाः निरूप्यन्ते एवम्।

१) द्वितीयाध्याये स्त्रियः स्वभावदुष्टास्सर्वथा नरं वशीकर्तुमेव यतन्ते। अतः स्त्रीविषये सदा पुरुषः जागरूको भवेदिति प्रतिपादितम्। नराणां दूषणं स्वभावः इति वचनं सर्वस्त्री निन्दकमेव । तद्यथा

**स्वभाव एव नारीणां नराणामिह दूषणम् ।**

**अतोऽर्थान्न प्रमाद्यन्ति प्रमदासु विपश्चितः ॥**

**अविद्वांसमलं लोके विद्वांसमपि वा पुनः ।**

**प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् ॥**

**मात्रा स्वस्वा दुहित्रा वा न विविक्तासनो भवेत् ।**

**बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥**[1]

२) मृते भर्तरि स्त्रियः पत्यन्तरग्रहणं निषिद्धम् आमरणम् एकपत्नी भवेदित्युक्तम्। जीवति भर्तरि प्रोषिते द्वितीयविवाहार्थमनुज्ञा दृश्यते। किं पुनः मृतस्य विषये इति कारणं न विदितम्। मृते भर्तरि न तस्य भार्यापरित्यागदोषः अतः परिग्रहान्तरं तत्र निषिद्धं स्यात् । किन्तु भार्यायाः मरणानन्तरमपत्यवानपि पुरुषः पुनः कृतविवाहो

ऽग्नीनामावाहनं कुर्यात्। अत्रापि प्रथमया भार्यया वियुक्तस्तया सह कर्मानुष्ठाने यानि यज्ञपात्राणि उपयुक्तानि तैरेव तां दाहयेत्। द्वितीयपरिग्रहानन्तरं पुनर्नूतनानि यज्ञसाधनानि स्वीकुर्यात्। अत्रापि अग्निहोत्रादिरक्षणाय तदा न दोषः।

३) नवमाध्यायारम्भेऽपि स्त्रीपुरुषधर्मप्रतिपादने एते विषयाः पुनरुक्तप्रायाः दृश्यन्ते। स्त्रीरक्षा सर्वथा कष्टसाध्येति मनुर्नवमाध्यायारम्भे प्रतिपादितवान् । श्लोकक्रमेण तेषां भावः निरूप्यते यथा स्त्रियो विषयसुखेभ्यो निवृत्ताः भवन्ति तथा पुरुषैस्ते रक्षणीयाः। विवाहयोग्यकाले कन्यादानमकृत्वा पिता निन्द्यो भवति। यौवने भार्यायाः रक्षणम् अकृत्वा तदा पतिर्निन्द्यः । किन्तु भर्तुः मरणानन्तरमेव पुत्रेण रक्षणीयमिति मनुः स्पष्टम् उक्तवान्। यत् आचार्य पुल्लेल श्रीरामचन्द्रैः समर्थितः स एव अर्थः अत्र श्लोके दृश्यते।

कालेऽदाता पिता वाच्यो वाच्यश्चानुनयन् पतिः।

मृते भर्तरि पुत्रस्तु वाच्यो मातुररक्षिता ॥[2]

सूक्ष्मप्रसंगेभ्यः अपि स्त्रियः रक्षणीयाः । अरक्षिताः ताः वंशद्वयं नाशयन्ति । भर्तारस्स्वयं दुर्बला अपि भार्यारक्षणे कृतयत्नाः भवेयुः तथैव सर्ववर्णरक्षा भवति।

एवं भार्यां रक्षन् भर्ता कुलं सन्तानमात्मानं च रक्षन् स्वधर्मरक्षको भवति।

'अङ्गादङ्गात् संभवसि...' इत्यादिश्रुतेः भर्तीव भार्यायां जायते। अतस्ताः रक्षणीयाः । भर्तारं स्वगर्भे जनयन् भार्या जाया भवति । एष श्लोकः आदिपर्वणि दुष्यन्तोपाख्याने ऽपि दृश्यते।

**पतिर्भार्यां संप्रविश्य गर्भो भूत्वेह जायते।**

**जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥**[3]

यादृशं पुरुषं स्त्री भजते तादृशमेव पुरुषं स्त्री प्रसूते। कारणगुणाः कार्ये संक्रामन्ति। अतः सन्तानशुद्धये स्त्रीरक्षा कार्या।

ताः निसर्गतः दुष्टाः इति तंत्र कारणं वचनं न समझर्स प्रतिभांति। निसर्गतः स्त्रियः दुश्शीलाः इति द्वादशभिः श्लोकैः मनुः निरूपितवान्। खियं यथा सा सततं व्यग्रा भवति तथा गृहकार्येषु योजयेत्। धनरक्षणं, धनव्ययः, गृहशौचम, अन्नादिपचनं, गृहोपकरणरक्षणम् इत्यादि कार्येषु सततं योजयेत्। रक्षिभिर्वृद्धाखियी न कदाचित् पतिव्रताः भवन्ति। या स्वयं सच्छीलास्ताः एव पतिव्रताः भवन्ति। स्त्रियः शीलभ्रंशहेतवोऽपि षट् मनुना निरूपिताः।

१) मद्यपानम्  २)दुर्जनसम्बद्धः

३) भर्तृवियोगः  ४) व्यर्थमटनम्

५) अकालनिद्रा  ६)परगृहवासः

इत्येतानि षट् स्त्रियो व्यभिचाराख्यदोषजनकानि एतेष्वपि पत्युः वियोगो मुख्यकारणम्। स्त्रियः अयं पुरुषो निधुवनकरणे समर्थः इत्येतावत् कारणं दृष्ट्वा परपुरुषे अनुरक्ताः भवन्ति, नान्यत्कारणम् पुरुषान्तरगमने रूपं, वयः इत्यादि भवति प्रायशः स्त्रियः पुंश्चल्यः पुरुषात् पुरुषं गच्छन्तीति भावः। तासां चित्तचाञ्चल्यमत्र कारणं भवति। ताः स्वभावतः स्नेहरहिताः यत्नेन रक्षिताः अपि पुरुषान्तरं गच्छन्ति। मनुः प्रागेव शय्या, आसनम्, अलङ्कारं कामं, क्रोधम्, ऋजुस्वभावराहित्यं, द्रोहभावः, दुर्वर्तनमित्येतानि दुर्लक्षणानि स्त्रीषु कल्पितवान्। वेदवाक्यान्यपि स्त्रीणां व्यभिचारस्वभावं निरूपयन्ति।

'यन्मे माता. इति मन्त्रः स्त्रियः अन्त्यसंस्कारेषु पठ्यते। मम माता मानसेन व्यभिचारेण मम पितरम् अतिचरितवती, तस्याः दुष्टस्वभावं मम पितुः रेतो वृन्ताम्। भग्नं करोतु इत्यर्थः पितुः रेतसा जातोऽहं पापीयान्। तत्र मातृदोषः कारणम्। संस्कारवतः मे पितुः वीर्यं मातुः दोषम् अपनुद्य मां शुद्धं करोतु इति कश्चन पुत्रः

प्रार्थयते। प्रायश्चित्तमन्त्रेष्वपि 'यन्मे माता... ' इति मन्त्रः पठ्यते। एष मन्त्रः पुत्रस्यैव प्रायश्चित्तहेतुः, न मातुः इति सन्देहनिवृत्तिमपि कृतवान्। अपि च यं पुरुषं स्त्री भजते, पुत्रोऽपि तद्गुणवान् जायते स्त्री अपि भर्तुः गुणान् प्राप्नोति। अक्षमाला नामहीनयोनिजा वशिष्ठेन सङ्गता ब्राह्मणी बभूव । अपि सारङ्गीति चटका मन्दपालेन ऋषिणा परिणीता पूजनीया बभूव। अक्षमालायाः कथा पुराणेषु मृग्या। मन्दपालकथा महाभारते सभापर्वणि खण्डवदहनसन्दर्भे वर्तते।

## नियोगव्यापारः

सन्तानाभावविषये मृते असमर्थे वा भर्तरि अनिच्छन्ती अपि स्त्री सन्तानार्थं स्वयं भर्त्रा भर्तृबन्धुभिः वा परपुरुषैर्योजिता भवति स्म। जीवत्यपि भर्तरि सन्तानोत्पादनाय असमर्थे पुरुषान्तरात् सन्तानप्राप्तिः पुराणेषु दृष्टा विशेषतो महाभारते। किन्दममुनिना शप्तः पाण्डुः सन्तानोत्पादनार्थं कुन्तीं माद्रीं च इन्द्रादिषु नियुक्तवान्। एवं कल्माषपादो नाम राजा स्वपत्नी मदयन्तीं वशिष्ठान्तिकं प्रेषितवानिति कथा भागवते प्रसिद्धा । आदिपर्वण्येव अङ्गराजो दीर्घतपसं मुनिं स्वभार्यासु सन्तानोत्पत्तये नियोजितवान्। स्वयं व्यभिचारं निषिध्य भर्तुः प्रयोजनसम्पादनार्थं पुनः स्त्रियो नियोजनं कियदुचितमिति न विद्मः नियोगविषये मनुः पूर्वाचरितं नियोगं यद्यपि स्वग्रन्थे उक्तवान् तथापि स व्यापारो निन्द्यः इति स्पष्टमुक्तवान्। कलियुगे एव नियोगव्यापारनिषेधः इति व्याख्यातृभिः व्याख्यातम्। नियोगप्रकारः तथा भर्तरि मृते पुनर्विवाहनिषेधश्च स्त्रियः प्रतिकूलविषयाः इति स्पष्टमेव।

मनुना स्त्रीदण्डविषयेऽपि महती दया दर्शिता। अपराधिन्योऽपि स्त्रियो न तीव्रं दण्डनीयाः । स्त्रीविषये पारुष्यं दर्शयन् पुरुषोऽपि महता दण्डेन दण्ड्यः इति स्पष्टमुक्तवान्। स्त्रियो हन्तारं घातयेदित्यपि मनुना स्पष्टमुक्तम्।

अवेदमनुसन्धेयं स्त्रीविषये ये गुणाः दर्शिताः ते सार्वकालिकाः, सर्वथा अनुष्ठेयाः। दोषाश्च तदानीं स्त्रीषु मनुना दृष्टाः, न अद्यतनोपयोगिनः। अद्यतनकाले एव प्राक्तनकालादपि स्त्रियो गुणवत्यः इति नवमाध्यायपरिशीलनेन स्पष्टं भवति ।

**न कश्चित् योषितश्शक्तः प्रसह्य परिरक्षितुम् ।**

**एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम् ॥**

**अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।**

**शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य चेक्षणे ॥**

**अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः ।**

**आत्मानमात्मना यास्तु रक्षेयुस्तास्सुरक्षिताः ॥**

**पानं दुर्जनसंसर्गं पत्या च विरहोऽटनम् ।**

**स्वप्नोऽस्य गेहवासश्च नारीसंदूषणानि षट् ॥**

[1] मनुस्मृतिः – अ.२ – श्लो. २१३-२१५, पृ - ८३
[2] मनुस्मृतिः अ.१, श्लोकः –४, पृ ४५३
[3] महाभारतम् –आदिपर्व – अ.७४ – श्लो–३७, पृ.- १४३